**श्रीश्री जगद्गुरु शंकराचार्य महासंस्थान दक्षिणाम्नाय श्रीशारदापीठ, शृंगेरि**

**श्रीशांकर तत्त्वप्रसार अभियान**

# श्रीशारदा शंकराचे भक्त  कार्तिक मासिक अंमलबजावणी प्रक्रिया

## सोमवार वगळता उर्वरित दिवस स्तोत्र पठण

एकश्लोकी

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं

स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।

चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने

किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो ॥

गणेशस्तुति

सरागलोकदुर्लभं विरागिलोकपूजितं

सुरासुरैर्नमस्कृतं जरापमृत्युनाशकम् ।

गिरा गुरुं श्रिया हरिं जयंति यत्पदार्चकाः

नमामि तं गणाधिपं कृपापयःपयोनिधिम् ॥

जगद्गुरु श्रीसच्चिदानंद शिवाभिनव नृसिंहभारती महास्वामि विरचित

### श्रीगुरुवंदन

शंकारूपेण मच्चित्तं पंकीकृतमभूद्यया ।
किंकरी यस्य सा माया शंकराचार्यमाश्रये ॥ 1 ॥

प्रह्लादवरदो देवो यो नृसिंहः परो हरिः ।
नृसिंहोपासकं नित्यं तं नृसिंहगुरुं भजे ॥ 2 ॥

श्रीसच्चिदानंद शिवाभिनव्यनृसिंहभारत्यभिधान् यतींद्रान् ।
विद्यानिधीन् मंत्रनिधीन् सदात्मनिष्ठान् भजे मानवशंभुरूपान् ॥ 3 ॥

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चंद्रशेखरभारतीम् ॥ 4 ॥

विवेकिनं महाप्रज्ञं धैर्यौदार्यक्षमानिधिम् ।
सदाभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥ 5 ॥

अज्ञानां जाह्नवीतीर्थं विद्यातीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥ 6 ॥

विद्याविनयसंपन्नं वीतरागं विवेकिनम् ।
वंदे वेदांततत्त्वज्ञं विधुशेखरभारतीम् ॥ 7 ॥

बिरुदावलि

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य
पदवाक्यप्रमाणपारावारपारीण–यमनियमासन
प्राणायामप्रत्याहारधारणाध्यान–
समाध्यष्टांगयोगानुष्ठाननिष्ठ–तपश्चक्रवर्ति
अनाद्यविच्छिन्नश्रीशंकराचार्यगुरुपरंपराप्राप्त
षड्दर्शनस्थापनाचार्य–व्याख्यानसिंहासनाधीश्वर
सकलनिगमागमसारहृदय–सांख्यत्रयप्रतिपादक
वैदिकमार्गप्रवर्तक–सर्वतंत्रस्वतंत्र–आदिराजधानी
विद्यानगरमहाराजधानीकर्णाटकसिंहासनप्रतिष्ठापनाचार्य
श्रीमद्राजाधिराजगुरु–भूमंडलाचार्य
ऋष्यशृंगपुरवराधीश्वर–तुंगभद्रातीरवासि
श्रीमद्विद्याशंकरपादपद्माराधक–श्रीमज्जगद्गुरु

श्रीमदभिनवविद्यातीर्थमहास्वामिगुरुकरकमलसंजात
श्रीमज्जगद्गुरु–श्रीभारतीतीर्थमहास्वामिनां तत्करकमलसंजात
श्रीमज्जगद्गुरु–श्रीविधुशेखरभारती–महास्वामिनां च
चरणारविंदयोः साष्टांगप्रणामान् समर्पयामः ॥

श्रीशारदा गीतॆ

शारदे करुणानिधे सकलानवांब सदा जनान् ।
चारणादिमगीत-वैभव -पूरिताखिल-दिक्तते ॥

भर्म-भूषण-भूषिते वररत्न मौलि विराजिते ।
शर्मदायिनि कर्ममोचिनि निर्मलं कुरु मानसम् ॥
हस्त संधृत पुस्तकाक्षपटी सुधा घट मुद्रिके ।
कस्तवास्ति हि वर्णने चतुरो नरः खचरोऽथवा ॥
जगद्गुरु श्रीचंद्रशेखरभारती महास्वामि विरचित

वेदसार - शिवस्तोत्र

पशूनां पतिं पापनाशं परेशं

गजेंद्रस्य कृत्तिं वसानं वरेण्यं ।

जटाजूटमध्ये स्फुरद्गांगवारिं

महादेवमेकं स्मरामि स्मरारिं ॥ 1 ॥

महेशं सुरेशं सुरारातिनाशं

विभुं विश्वनाथं विभूत्यंगभूषं ।

विरूपाक्षमिंद्वर्कवह्नित्रिनेत्रं

सदानंदमीडे प्रभुं पंचवक्त्रं ॥ 2 ॥

गिरीशं गणेशं गले नीलवर्णं

गवेंद्राधिरूढं गुणातीतरूपं ।

भवं भास्वरं भस्मना भूषितांगं

भवानीकलत्रं भजे पंचवक्त्रं ॥ 3 ॥

शिवाकांत शंभो शशांकार्धमौले

महेशान शूलिंजटाजूटधारिन् ।

त्वमेको जगद्व्यापको विश्वरूपः

प्रसीद प्रसीद प्रभो पूर्णरूप ॥ 4 ॥

परात्मानमेकं जगद्बीजमाद्यं

निरीहं निराकारमोंकारवेद्यं ।

यतो जायते पाल्यते येन विश्वं

तमीशं भजे लीयते यत्र विश्वं ॥ 5 ॥

न भूमिर्न चापो न वह्निर्न वायु-

र्न चाकाशमास्ते न तंद्रा न निद्रा ।

न चोष्णं न शीतं न देशो न वेषो

न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ 6 ॥

अजं शाश्वतं कारणं कारणानां

शिवं केवलं भासकं भासकानां ।

तुरीयं तमःपारमाद्यंतहीनं

प्रपद्ये परं पावनं द्वैतहीनं ॥ 7 ॥

नमस्ते नमस्ते विभो विश्वमूर्ते

नमस्ते नमस्ते चिदानंदमूर्ते ।

नमस्ते नमस्ते तपोयोगगम्य

नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ 8 ॥

प्रभो शूलपाणे विभो विश्वनाथ

महादेव शंभो महेश त्रिनेत्र ।

शिवाकांत शांत स्मरारे पुरारे

त्वदन्यो वरेण्यो न मान्यो न गण्यः॥ 9 ॥

शंभो महेश करुणामय शूलपाणे

गौरीपते पशुपते पशुपाशनाशिन् ।

काशीपते करुणया जगदेतदेक-

स्त्वं हंसि पासि विदधासि महेश्वरोऽसि॥10॥

त्वत्तो जगद्भवति देव भव स्मरारे

त्वय्येव तिष्ठति जगन्मृड विश्वनाथ।

त्वय्येव गच्छति लयं जगदेतदीश

लिंगात्मके हर चराचरविश्वरूपिन् ॥ 11 ॥

जगद्गुरु श्रीशंकरभगवत्पाद विरचित

## चंद्रमौलीश्वर-वर्णमाला-स्तोत्र

श्रीशात्मभूमुख्यसुरार्चितांघ्रिं श्रीकंठशर्वादिपदाभिधेयं।

श्रीशंकराचार्यहृदब्जवासं श्रीचंद्रमौलीशमहं नमामि ॥ 1 ॥

चंडांशुशीतांशुकृशानुनेत्रं चंडीशमुख्यप्रमथेड्यपादं।

षडास्यनागास्यसुशोभिपार्श्वं श्रीचंद्रमौलीशमहं नमामि ॥ 2 ॥

द्रव्यादिसृष्टिस्थितिनाशहेतुं रव्यादितेजांस्यपि भासयंतं।

पव्यायुधादिस्तुतवैभवं तं श्रीचंद्रमौलीशमहं नमामि ॥ 3 ॥

मौलिस्पुरज्जह्नुसुतासितांशुं व्यालेशसंवेष्टितपाणिपादं।

शूलादिनानायुधशोभमानं श्रीचंद्रमौलीशमहं नमामि ॥ 4 ॥

लीलाविनिर्धूतकृतांतदर्पं शैलात्मजासंश्रितवामभागं ।
शूलाग्रनिर्भिन्नसुरारिसंघं श्रीचंद्रमौलीशमहं नमामि ॥ 5 ॥
शतैः श्रुतीनां परिगीयमानं यतैर्मुनींद्रैः परिसेव्यमानं |
नतैः सुरेंद्रैरभिपूज्यमानं श्रीचंद्रमौलीशमहं नमामि ॥ 6 ॥
मत्तेभकृत्या परिशोभितांगं चित्ते यतीनां सततं वसंतं ।
वित्तेशमुख्यैः परिवेष्टितं तं श्रीचंद्रमौलीशमहं नमामि ॥ 7 ॥
हंसोत्तमैः चेतसि चिंत्यमानं संसारपाथोनिधिकर्णधारं ।
तं सामगानप्रियमष्टमूर्तिं श्रीचंद्रमौलीशमहं नमामि ॥ 8 ॥
नताघहं नित्यचिदेकरूपं सतां गतिं सत्यसुखस्वरूपं ।
हतांधकं हृद्यपराक्रमं तं श्रीचंद्रमौलीशमहं नमामि ॥ 9 ॥
मायातिगं वीतभयं विनिद्रं मोहांतकं मृत्युहरं महेशं
फालानलं नीलगलं कृपालुं श्रीचंद्रमौलीशमहं नमामि ॥ 10 ॥
मित्रं हि यस्याखिलशेवधीशः पुत्रश्च विघ्नौघविभेददक्षः ।
पात्रं कृपायाश्च समस्तलोकः श्रीचंद्रमौलीशमहं नमामि ॥ 11 ॥
जगद्गुरु श्रीश्रीभारतीतीर्थ महास्वामि विरचित

शिवाष्टोत्तर शतनामावलि

ॐ शिवाय नमः

महेश्वराय नमः

शंभवे नमः

पिनाकिने नमः

शशिशेखराय नमः

वामदेवाय नमः

विरूपाक्षाय नमः

कपर्दिने नमः

नीललोहिताय नमः

शंकराय नमः 10

शूलपाणये नमः

खट्वांगिने नमः

विष्णुवल्लभाय नमः

शिपिविष्टाय नमः

अंबिकानाथाय नमः

श्रीकंठाय नमः

भक्तवत्सलाय नमः

भवाय नमः

शर्वाय नमः

त्रिलोकेशाय नमः 20

शितिकंठाय नमः

शिवाप्रियाय नमः

उग्राय नमः

कपालिने नमः

कामारये नमः

अंधकासुरसूदनाय नमः

गंगाधराय नमः

ललाटाक्षाय नमः

कालकालाय नमः

कृपानिधये नमः 30

भीमाय नमः

परशुहस्ताय नमः

मृगपाणये नमः

जटाधराय नमः

कैलासवासिने नमः

कवचिने नमः

कठोराय नमः

त्रिपुरांतकाय नमः

वृषांकाय नमः

वृषभारूढाय नमः 40

भस्मोद्धूलितविग्रहाय नमः

सामप्रियाय नमः

स्वरमयाय नमः

त्रयीमूर्तये नमः

अनीश्वराय नमः

सर्वज्ञाय नमः

परमात्मने नमः

सोमसूर्याग्निलोचनाय नमः

हविषे नमः

यज्ञमयाय नमः 50

सोमाय नमः

पंचवक्त्राय नमः

सदाशिवाय नमः

विश्वेश्वराय नमः

वीरभद्राय नमः

गणनाथाय नमः

प्रजापतये नमः

हिरण्यरेतसे नमः

दुर्धर्षाय नमः

गिरीशाय नमः 60

गिरिशाय नमः

अनघाय नमः

भुजंगभूषणाय नमः

भर्गाय नमः

गिरिधन्वने नमः

गिरिप्रियाय नमः

कृत्तिवाससे नमः

पुरारातये नमः

भगवते नमः

प्रमथाधिपाय नमः 70

मृत्युंजयाय नमः

सूक्ष्मतनवे नमः

जगद्व्यापिने नमः

जगद्गुरवे नमः

व्योमकेशाय नमः

महासेनजनकाय नमः

चारुविक्रमाय नमः

रुद्राय नमः

भूतपतये नमः

स्थाणवे नमः 80

अहयेबुध्नियाय नमः

दिगंबराय नमः

अष्टमूर्तये नमः

अनेकात्मने नमः

सात्विकाय नमः

शुद्धविग्रहाय नमः

शाश्वताय नमः

खंडपरशवे नमः

अजाय नमः

पाशविमोचकाय नमः 90

मृडाय नमः

पशुपतये नमः

देवाय नमः

महादेवाय नमः

अव्ययाय नमः

हरये नमः

पूषदंतभिदे नमः

अव्यग्राय नमः

दक्षाध्वरहराय नमः

हराय नमः 100

भगनेत्रभिदे नमः

अव्यक्ताय नमः

सहस्राक्षाय नमः

सहस्रपदे नमः

अपवर्गप्रदाय नमः

अनंताय नमः

तारकाय नमः

परमेश्वराय नमः 108

## अच्युताष्टक

अच्युतं केशवं रामनारायणं
कृष्णदामोदरं वासुदेवं हरिं ।
श्रीधरं माधवं गोपिकावल्लभं
जानकीनायकं रामचंद्रं भजे ॥ 1 ॥

अच्युतं केशवं सत्यभामाधवं
माधवं श्रीधरं राधिकाराधितं ।

इंदिरामंदिरं चेतसा सुंदरं
देवकीनंदनं नंदजं संदधे ॥ 2 ॥
विष्णवे जिष्णवे शंखिने चक्रिणे
रुक्मिणीरागिणे जानकीजानये ।
वल्लवीवल्लभायार्चितायात्मने
कंसविध्वंसिने वंशिने ते नमः ॥ 3 ॥
कृष्ण गोविंद हे राम नारायण
श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानंत हे माधवाधोक्षज
द्वारकानायक द्रौपदीरक्षक ॥ 4 ॥
राक्षसक्षोभितः सीतया शोभितो
दंडकारण्यभूपुण्यताकारणं ।
लक्ष्मणेनान्वितो वानरैः सेवितोऽ-
गस्त्यसंपूजितो राघवः पातु मां ॥ 5 ॥
धेनुकारिष्टहाऽनिष्टकृद्द्वेषिणां
केशिहा कंसहृद्वंशिकावादकः ।
पूतनाकोपकः सूरजाखेलनो
बालगोपालकः पातु मां सर्वदा ॥ 6 ॥
विद्युदुद्योतवत्प्रस्फुरद्वाससं
प्रावृडंभोदवत्प्रोल्लसद्विग्रहं ।

वन्यया मालया शोभितोरःस्थलं

लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ 7 ॥

कुंचितैः कुंतलैर्भ्राजमानाननं

रत्नमौलिं लसत्कुंडलं गंडयोः ।

हारकेयूरकं कंकणप्रोज्ज्वलं

किंकिणीमंजुलं श्यामलं तं भजे ॥ 8 ॥

अच्युतस्याष्टकं यः पठेदिष्टदं

प्रेमतः प्रत्यहं पूरुषः सस्पृहं ।

वृत्ततः सुंदरं वेद्यविश्वंभरं

तस्य वश्यो हरिर्जायते सत्वरं ॥ 9 ॥

जगद्गुरु श्रीशंकरभगवत्पाद विरचित

## श्रीशंकराचार्य अष्टोत्तर शतनामावलि

श्रीशंकराचार्यवर्याय नमः

ब्रह्मानंदप्रदायकाय नमः

अज्ञानतिमिरादित्याय नमः

सुज्ञानांबुधिचंद्रमसे नमः

वर्णाश्रमप्रतिष्ठात्रे नमः

श्रीमते नमः

मुक्तिप्रदायकाय नमः

शिष्योपदेशनिरताय नमः

भक्ताभीष्टप्रदायकाय नमः

सूक्ष्मतत्त्वरहस्यज्ञाय नमः 10

कार्याकार्यप्रबोधकाय नमः

ज्ञानमुद्रांचितकराय नमः

शिष्यहृत्तापहारकाय नमः

परिव्राजाश्रमोद्धर्त्रे नमः

सर्वतंत्रस्वतंत्रधिये नमः

अद्वैतस्थापनाचार्याय नमः

साक्षाच्छंकररूपधृते नमः

षण्मतस्थापनाचार्याय नमः

त्रयीमार्गप्रकाशकाय नमः

वेदवेदांततत्त्वज्ञाय नमः 20

दुर्वादिमतखंडनाय नमः

वैराग्यनिरताय नमः

शांताय नमः

संसारार्णवतारकाय नमः

प्रसन्नवदनांभोजाय नमः

परमार्थप्रकाशकाय नमः

पुराणस्मृतिसारज्ञाय नमः

नित्यतृप्ताय नमः

महते नमः

शुचये नमः 30

नित्यानंदाय नमः

निरातंकाय नमः

निस्संगाय नमः

निर्मलात्मकाय नमः

निर्ममाय नमः

निरहंकाराय नमः

विश्ववंद्यपदांबुजाय नमः

सत्त्वप्रधानाय नमः

सद्भावाय नमः

संख्यातीतगुणोज्ज्वलाय नमः 40

अनघाय नमः

सारहृदयाय नमः

सुधिये नमः

सारस्वतप्रदाय नमः

सत्यात्मने नमः

पुण्यशीलाय नमः

सांख्ययोगविचक्षणाय नमः

तपोराशये नमः

महातेजसे नमः

गुणत्रयविभागविदे नमः 50

कलिघ्नाय नमः

कालकर्मज्ञाय नमः

तमोगुणनिवारकाय नमः

भगवते नमः

भारतीजेत्रे नमः

शारदाह्वानपंडिताय नमः

धर्माधर्मविभागज्ञाय नमः

लक्ष्यभेदप्रदर्शकाय नमः

नादबिंदुकलाभिज्ञाय नमः

योगिहृत्पद्मभास्कराय नमः 60

अतींद्रियज्ञाननिधये नमः

नित्यानित्यविवेकवते नमः

चिदानंदाय नमः

चिन्मयात्मने नमः

परकायप्रवेशकृते नमः

अमानुषचरित्राढ्याय नमः

क्षेमदायिने नमः

क्षमाकराय नमः

भव्याय नमः

भद्रप्रदाय नमः 70

भूरिमहिम्ने नमः

विश्वरंजकाय नमः

स्वप्रकाशाय नमः

सदाधाराय नमः

विश्वबंधवे नमः

शुभोदयाय नमः

विशालकीर्तये नमः

वागीशाय नमः

सर्वलोकहितोत्सुकाय नमः

कैलासयात्रा-संप्राप्त-चंद्रमौलि-प्रपूजकाय नमः 80

कांच्यां श्रीचक्रराजाख्य-यंत्रस्थापन-दीक्षिताय नमः

श्रीचक्रात्मक-ताटंक-तोषितांबा-मनोरथाय नमः

श्रीब्रह्मसूत्रोपनिषद्भाष्यादि-ग्रंथकल्पकाय नमः

चतुर्दिक्चतुराम्नाय प्रतिष्ठात्रे नमः

महामतये नमः

द्विसप्ततिमतोच्छेत्रे नमः

सर्वदिग्विजयप्रभवे नमः

काषायवसनोपेताय नमः

भस्मोद्धूलितविग्रहाय नमः

ज्ञानात्मकैकदंडाढ्याय नमः 90

कमंडलुलसत्कराय नमः

गुरुभूमंडलाचार्याय नमः

भगवत्पादसंज्ञकाय नमः

व्याससंदर्शनप्रीताय नमः

ऋष्यशृंगपुरेश्वराय नमः

सौंदर्यलहरीमुख्य-बहुस्तोत्र-विधायकाय नमः

चतुष्षष्टिकलाभिज्ञाय नमः

ब्रह्मराक्षसमोक्षदाय नमः

श्रीमन्मंडनमिश्राख्य-स्वयंभूजय-सन्नुताय नमः

तोटकाचार्यसंपूज्याय नमः 100

पद्मपादार्चितांघ्रिकाय नमः

हस्तामलक-योगींद्र-ब्रह्मज्ञान-प्रदायकाय नमः

सुरेश्वराख्य-सच्छिष्य-संन्यासाश्रमदायकाय नमः

नृसिंहभक्ताय नमः

सद्रत्नगर्भहेरंब-पूजकाय नमः

व्याख्यासिंहासनाधीशाय नमः

जगत्पूज्याय नमः

जगद्गुरवे नमः 108

श्रीमच्छंकरभगवत्पादाचार्यस्वामिने नमः

## मंगळ

मंगळं गुरु श्री चंद्रमौळीश्वरगे

शक्तिगणपति शारदांबॆगॆ शंकराचार्यरिगे ॥ प ॥

कालभैरवगे काळि दुर्गिगे

वीर धीर शूर हनुम मारुति चरणक्के ॥ 2 ॥

मल्लिकार्जुनगे चॆल्व जनार्दनगे

अंबाभवानि कंबद गणपति चंडिचामुंडिगे ॥ 3 ॥

विद्यारण्यरिगे विद्याशंकरगे

वागीश्वरिगे वज्रदेह गरुडांजनेयरिगे ॥ 4 ॥

तुंगभद्रॆगे श्रृंगनिवासिनिगे
श्रृंगेरिपुरदॊळु नॆलॆसिरुवंथ शारदांबॆगे ॥ 5 ॥

सच्चिदानंद शिव अभिनव नृसिंहभारतिगे
चंद्रशेखरभारती गुरु सार्वभौमरिगे
चंद्रशेखरभारती गुरु विद्यातीर्थरिगे
चंद्रशेखरभारती गुरु भारतीतीर्थरिगे
चंद्रशेखरभारती विधुशेखरभारतिगे ॥ 6 ॥

# कार्तिक सोमवारची अंमलबजावणी कार्यवाही

कार्तिकमासाचा पहिला सोमवार, **08-11-2021**

प्रारंभ:

एकश्लोकी – गणेशस्तुति – गुरुवंदन – बिरुदावळि – श्रीशारदा गीतॆगळ पठना नंतर आया सोमवारद विशेष स्तोत्रगळन्नु पठिसि अंत्यदल्लि श्रीशंकराचार्य अष्टोत्तर शतनामावळि – मंगळ दॊंदिगॆ मुक्ताय माडुवुदु.

कीर्तनॆ

भोलेनाथ उमापते शंभोशंकर पशुपते जै
नंदिवाहन नागभूषण चंद्रशेखर जटाधर
गंगाधर गौरीमनोहर गिरिजाकांत महादेव हर ॥
त्रिशूलपाणे ज्योतिप्रकाश विभूतिसुंदर परमेश
श्मशानवास चिदंबरेश नीलकंठ महादेव हर ॥
कैलासवास कनकसभेश गौरीमनोहर विश्वेश
डं डं डं डं डमरुगनाथ पार्वतिरमण सदाशिव हर ॥

## चंद्रशेखराष्टक

चंद्रशेखर चंद्रशेखर चंद्रशेखर पाहि माम् ।
चंद्रशेखर चंद्रशेखर चंद्रशेखर रक्ष माम् ॥

रत्नसानुशरासनं रजताद्रिशृंगनिकेतनं
शिंजिनीकृतपन्नगेश्वरमच्युतानलसायकम्।
क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवंदितं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 1 ॥
पंचपादपपुष्पगंधपदांबुजद्वयशोभितं
फाललोचन जातपावक दग्धमन्मथविग्रहम् ।
भस्मदिग्धकळेबरं भवनाशनं भवमव्ययं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 2 ॥
मत्तवारणमुख्यचर्मकृतोत्तरीय मनोहरं
पंकजासन पद्मलोचन पूजितांघ्रि सरोरुहम् ।
देवसिंधुतरंगशीकर-सिक्तशुभ्रजटाधरं
चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 3 ॥
यक्षराजसखं भगाक्षहरं भुजंगविभूषणं
शैलराजसुतापरिष्कृत-चारुवामकळेबरम् ।
क्ष्वेलनीलगलं परश्वधधारिणं मृगधारिणं

चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 4 ॥

कुंडलीकृतकुंडलेश्वरकुंडलं वृषवाहनं

नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।

अंधकांतकमाश्रितामरपादपं शमनांतकं

चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 5 ॥

भेषजं भवरोगिणामखिलापदामपहारिणं

दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।

भुक्तिमुक्तिफलप्रदं सकलाघसंघनिबर्हणं

चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 6 ॥

भक्तवत्सलमर्चितं निधिमक्षयं हरिदंबरं

सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् ।

सोमवारुण भूहुताशन सोमपानिखिलाकृतिं

चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 7 ॥

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं

संहरंतमपिप्रपंचमशेषलोकनिवासिनम् ।

क्रीडयंतमहर्निशं गणनाथयूथसमन्वितं

चंद्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ 8 ॥

मृत्युभीत मृकंडुसूनुकृतस्तवं शिवसन्निधौ

यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।

पूर्णमायुररोगतामखिलार्थसंपदमादरं

चंद्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ 9 ॥

श्रीमार्कंडेय मुनि विरचित

## कार्तिकमासाचा दुसरा सोमवार, **15-11-2021**

### दक्षिणामूर्त्यष्टक

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजांतर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 1 ॥

बीजस्यांतरिवांकुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकाल कलनावैचित्र्यचित्रीकृतं ।
मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 2 ॥
यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।

यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 3 ॥
नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पंदते ।
जानामीति तमेव भांतमनुभात्येतत्समस्तं जग-
त्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 4 ॥
देहं प्राणमपींद्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालांधजडोपमास्त्वहमिति भ्रांता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 5 ॥
राहुग्रस्तदिवाकरेंदुसदृशो मायासमाच्छादना-
त्सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 6 ॥
बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यंतः स्फुरंतं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 7 ॥
विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबंधतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।

स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामित-

स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 8 ॥

भूरंभांस्यनलोऽनिलोऽंबरमहर्नाथो हिमांशुः पुमा-

नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकं ।

नान्यत्किंचन विद्यते विमृशतां यस्मात्परस्माद्विभो-

स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ 9 ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे

तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च संकीर्तनात् ।

सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः

सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतं ॥ 10 ॥

जगद्गुरु श्रीशंकरभगवत्पाद विरचित

## कार्तिकमासाचा तिसरा सोमवार, **22-11-2021**

उमामहेश्वरस्तोत्र

नमः शिवाभ्यां नवयौवनाभ्यां

परस्पराश्लिष्टवपुर्धराभ्यां

नगेंद्रकन्यावृषकेतनाभ्यां

नमो नमः शंकरपार्वतीभ्यां ॥1॥

नमः शिवाभ्यां सरसोत्सवाभ्यां
नमस्कृताभीष्टवरप्रदाभ्यां
नारायणेनार्चितपादुकाभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥2॥
नमः शिवाभ्यां वृषवाहनाभ्यां
विरिंचिविष्ण्विंद्रसुपूजिताभ्यां
विभूतिपाटीरविलेपनाभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥3॥
नमः शिवाभ्यां जगदीश्वराभ्यां
जगत्पतिभ्यां जयविग्रहाभ्यां
जंभारिमुख्यैरभिवंदिताभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥4॥
नमः शिवाभ्यां परमौषधीभ्यां
पंचाक्षरीपंजररंजिताभ्यां
प्रपंचसृष्टिस्थितिसंहृताभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥5॥
नमः शिवाभ्यामतिसुंदराभ्या-
मत्यंतमासक्तहृदंबुजाभ्यां
अशेषलोकैकहितंकराभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥6॥

नमः शिवाभ्यां कलिनाशनाभ्यां
कंकालकल्याणवपुर्धराभ्यां
कैलासशैलस्थितदेवताभ्यां
नमोः नमः शंकरपार्वतीभ्यां ॥7॥
नमः शिवाभ्यामशुभापहाभ्या-
मशेषलोकैकविशेषिताभ्यां
अकुंठिताभ्यां स्मृतिसंभृताभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥8॥
नमः शिवाभ्यां रथवाहनाभ्यां
रवींदुवैश्वानरलोचनाभ्यां
राकाशशांकाभमुखांबुजाभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥9॥
नमः शिवाभ्यां जटिलंधराभ्यां
जरामृतिभ्यां च विवर्जिताभ्यां
जनार्दनाब्जोद्भवपूजिताभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥10॥
नमः शिवाभ्यां विषमेक्षणाभ्यां
बिल्वच्छदामल्लिकदामभृद्भ्यां
शोभावतीशांतवतीश्वराभ्यां
नमो नमः शंकरपार्वतीभ्यां ॥11॥

नमः शिवाभ्यां पशुपालकाभ्यां

जगत्त्रयीरक्षणबद्धहृद्भ्यां

समस्तदेवासुरपूजिताभ्यां

नमो नमः शंकरपार्वतीभ्यां ॥12॥

स्तोत्रं त्रिसंध्यं शिवपार्वतीभ्यां

भक्त्या पठेद्द्वादशकं नरो यः

स सर्वसौभाग्यफलानि भुंक्ते

शतायुरंते शिवलोकमेति ॥13॥

जगद्गुरु श्रीशंकरभगवत्पाद विरचित

## कार्तिकमासाचा चौथा सोमवार, **29-11-2021**

कीर्तनें

तीर्थ विठ्ठल क्षेत्र विठ्ठल ।

देव विठ्ठल देवपूजा विठ्ठल ॥

माता विठ्ठल पिता विठ्ठल ।

बंधु विठ्ठल गोत्र विठ्ठल ॥

गुरु विठ्ठल गुरुदेवता विठ्ठल ।
निधान विठ्ठल निरंतर विठ्ठल ॥

नामा म्हणे मज विठ्ठल सांपडला ।
म्हणोनी कळिकाळां पाड नाहीम् ॥

## श्रीमहाबलेशाष्टक

विशालकरुणं विभुं तरुणचंद्र सद्भूषणं
धराधरसुतापतिं तरुणचंद्रकोटिप्रभम् ।
मनोरथविवर्धनं दुरितवर्गविध्वंसनं
महाबलशिवं भजे महितसर्वकल्याणदम् ॥1॥

समाहितमनोनुतं शमितदैत्यदंभं प्रभुं
भवार्णवविशोषणं विहितभक्तसंतोषणम् ।
चराचरसुमंदिरं विधृतबालचंद्रं शिवं

नमामि गिरिजापतिं नलिननेत्रमित्रं परम् ॥2॥

पराभवविवर्जितं जय जयेति देवैर्नुतं
नमामि जगतां गुरुं जननमृत्युदूरं हरम् ।
जनार्दनसहोदरीनयनपद्मभानूपमं
पुराणपुरुषार्चितं शरणलोकसंरक्षकम् ॥3॥

दुराचरणभीषणं दुरितवर्गसंहारिणं
महागिरिवराश्रयं मुनिवरेण्यसंसेवितम् ।
हिरण्यनिधिदायकं करुणयैव संरक्षकं
कलाधरसुशेखरं नमत नित्यकल्याणदम् ॥4॥

महागदविदारणं मदनगर्वविश्लोषणं
भवं त्रिपुरघातिनं ह्यनलनेत्रमिंद्रार्चितम् ।
गिरींद्रतनयासखं सकलसौख्यसंदायकं
महाबलमुपास्महे निगमगम्यरूपं शिवम् ॥5॥

शिलींद्रकुसुमप्रियं वरशिरीषमाल्यान्वितं
सुबिल्वदलपूजितं वनजदिव्यपुष्पप्रियम् ।
विरिंचिहरिसन्नुतं भजत पंचवक्त्रं प्रभुं

प्रपंच परिपालकं वरचिरंतनाभ्यर्चितम् ॥6॥

चिरंतरवचोनुतं ह्यघचयस्य विध्वंसकं
ममाशु कविताप्रदं करिमुखस्य तातं विभुम् ।
कवींद्र परिसन्नुतं नमत नीलकंठं वरं
वरप्रदमहाबलं सुगुणकृष्णभूपावनम् ॥7॥

मनोरथविदायकं मनुकुलेशसंपूजितं
ह्युमार्धसुकलेबरं विधृतदिव्यगंगापगम् ।
वृषेंद्रवरवाहनं सुरवरेंद्र संतोषणं
जगद्भरणमीश्वरं तरुणचंद्रमौलिं भजे ॥8॥

महाबलनुतिं जना वचसि धारयंत्यन्वहं
नृकेसरिगिरेरितां सकलसौख्यसंपत्प्रदाम् ।
सुसंततिविधायिनीं शुभकदंब संवर्धिनीं
भजंति शुभमेव ते शिवपदाब्जभक्ता भुवि ॥9॥

जगद्गुरु श्रीनृसिंहभारती महास्वामि विरचित

# कार्तिक पौर्णिमेची अंमलबजावणी

**प्रारंभ:**

एकश्लोकी – गणेशस्तुति – गुरुवंदन – बिरुदावळि – श्रीशारदा गीतॆगळ पठना नंतर पौर्णिमॆय ई विशेष स्तोत्रगळन्नु पठिसि अंत्यदल्लि श्रीशंकराचार्य अष्टोत्तर शतनामावळि – मंगळ दॊंदिगॆ मुक्ताय माडुवुदु.

विश्वनाथाष्टक

गंगातरंगरमणीयजटाकलापं
गौरीनिरंतरविभूषितवामभागं ।
नारायणप्रियमनंगमदापहारं
वाराणसीपुरपतिं भज विश्वनाथं ॥ 1 ॥

वाचामगोचरमनेकगुणस्वरूपं

वागीशविष्णुसुरसेवितपादपीठं ।
वामेनविग्रहवरेणकलत्रवंतं
वाराणसीपुरपतिं भज विश्वनाथं ॥ 2 ॥

भूताधिपं भुजगभूषणभूषितांगं
व्याघ्राजिनांबरधरं जटिलं त्रिनेत्रं ।
पाशांकुशाभयवरप्रदशूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथं ॥ 3 ॥

शीतांशुशोभितकिरीटविराजमानं
भालेक्षणानलविशोषितपंचबाणं ।
नागाधिपारचितभासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथं ॥ 4 ॥

पंचाननं दुरितमत्तमतंगजानां
नागांतकं दनुजपुंगवपन्नगानां ।
दावानलं मरणशोकजराटवीनां
वाराणसीपुरपतिं भज विश्वनाथं ॥ 5 ॥
तेजोमयं सगुणनिर्गुणमद्वितीयं
आनंदकंदमपराजितमप्रमेयं ।

नागात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथं ॥ 6 ॥

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशांतिनिलयं गिरिजासहायं ।
माधुर्यधैर्यसुभगं गरलाभिरामं
वाराणसीपुरपतिं भज विश्वनाथं ॥ 7 ॥

आशां विहाय परिहृत्य परस्य निंदां
पापे रतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथं ॥ 8 ॥

वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनंतकीर्तिं
संप्राप्य देहविलये लभते च मोक्षं ॥ 9 ॥

विश्वनाथाष्टकमिदं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥ 10 ॥

भगवान् श्रीवेदव्यास विरचित

## शिवमानस – पूजा - स्तोत्र

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्यांबरं
नानारत्नविभूषितं मृगमदामोदांकितं चंदनम्।
जातीचंपक बिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ 1 ॥

सौवर्णे नवरत्नखंडरचिते पात्रेघृतं पायसं
भक्ष्यं पंचविधं पयोदधियुतं रंभाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखंडोज्ज्वलं
तांबूलं मनसा मया विरचितं भक्त्या प्रभोस्वीकुरु ॥ 2 ॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरि मृदंगकाहलकला गीतं च नृत्यं तथा ।
साष्टांगं प्रणतिः श्रुतिर्बहुविधा ह्येतत्समस्तं मया

संकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ 3 ॥

आत्मात्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
संचारः पदयो प्रदक्षिणविधिः स्तोत्राणि सर्वागिरो
यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥ 4 ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधं ।
विहितमविहितं वा सर्वमेतत् क्षमस्व
जयजय करुणाब्धे श्री महादेव शंभो ॥ 5 ॥
जगद्गुरु श्रीशंकरभगवत्पाद विरचित

शिव-पंचाक्षर-नक्षत्र-माला-स्तोत्र

श्रीमदात्मने गुणैकसिंधवे नमः शिवाय
धामलेशधूतकोकबंधवे नमः शिवाय।
नामशेषितानमद्भवांधवे नमः शिवाय
पामरेतरप्रधानबंधवे नमः शिवाय॥1

कालभीतविप्रबालपाल ते नमः शिवाय
शूलभिन्नदुष्टदक्षफाल ते नमः शिवाय ।
मूलकारणाय कालकाल ते नमः शिवाय
पालयाधुना दयालवाल ते नमः शिवाय ॥ 2

इष्टवस्तुमुख्यदानहेतवे नमः शिवाय
दुष्टदैत्यवंशधूमकेतवे नमः शिवाय ।
सृष्टिरक्षणाय धर्मसेतवे नमः शिवाय
अष्टमूर्तये वृषेंद्रकेतवे नमः शिवाय॥ 3

आपदद्रिभेदटंकहस्त ते नमः शिवाय
पापहारिदिव्यसिंधुमस्त ते नमः शिवाय ।
पापदारिणे लसन्नमस्तते नमः शिवाय
शापदोषखंडनप्रशस्त ते नमः शिवाय ॥ 4 ॥

व्योमकेश दिव्यभव्यरूप ते नमः शिवाय
हेममेदिनीधरेंद्रचाप ते नमः शिवाय।
नाममात्रदग्धसर्वपाप ते नमः शिवाय
कामनैकतानहृद्दुराप ते नमः शिवाय ॥ 5

ब्रह्ममस्तकावलीनिबद्ध ते नमः शिवाय
जिह्मगेंद्रकुंडलप्रसिद्ध ते नमः शिवाय ।
ब्रह्मणे प्रणीतवेदपद्धते नमः शिवाय
जिंहकालदेहदत्तपद्धते नमः शिवाय ॥ 6 ॥

कामनाशनाय शुद्धकर्मणे नमः शिवाय
सामगानजायमानशर्मणे नमः शिवाय ।
हेमकांतिचाकचक्यवर्मणे नमः शिवाय
सामजासुरांगलब्धचर्मणे नमः शिवाय॥ 7

जन्ममृत्युघोरदुःखहारिणे नमः शिवाय
चिन्मयैकरूपदेहधारिणे नमः शिवाय।
मन्मनोरथावपूर्तिकारिणे नमः शिवाय
सन्मनोगताय कामवैरिणे नमः शिवाय॥ 8

यक्षराजबंधवे दयालवे नमः शिवाय
दक्षपाणिशोभिकांचनालवे नमः शिवाय ।
पक्षिराजवाहहृच्छयालवे नमः शिवाय
अक्षिफाल वेदपूततालवे नमः शिवाय॥ 9 ॥

दक्षहस्तनिष्ठजातवेदसे नमः शिवाय
अक्षरात्मने नमद्बिडौजसे नमः शिवाय ।
दीक्षितप्रकाशितात्मतेजसे नमः शिवाय
उक्षराजवाह ते सतां गते नमः शिवाय॥ 10

राजताचलेंद्रसानुवासिने नमः शिवाय
राजमाननित्यमंदहासिने नमः शिवाय ।
राजकोरकावतंस भासिने नमः शिवाय
राजराजमित्रताप्रकाशिने नमः शिवाय॥ 11 ॥

दीनमानवालिकामधेनवे नमः शिवाय
सूनबाणदाहकृत्कृशानवे नमः शिवाय ।
स्वानुरागभक्तरत्नसानवे नमः शिवाय
दानवांधकारचंडभानवे नमः शिवाय॥ 12

सर्वमंगलाकुचाग्रशायिने नमः शिवाय
सर्वदेवतागणातिशायिने नमः शिवाय ।
पूर्वदेवनाशसंविधायिने नमः शिवाय
सर्वमन्मनोजभंगदायिने नमः शिवाय॥ 13

स्तोकभक्तितोऽपि भक्तपोषिणे नमः शिवाय
माकरंदसारवर्षिभाषिणे नमः शिवाय ।
एकबिल्वदानतोऽपि तोषिणे नमः शिवाय
नैकजन्मपापजालशोषिणे नमः शिवाय॥ 14

सर्वजीवरक्षणैकशीलिने नमः शिवाय
पार्वतीप्रियाय भक्तपालिने नमः शिवाय ।
दुर्विदग्धदैत्यसैन्यदारिणे नमः शिवाय
शर्वरीशधारिणे कपालिने नमः शिवाय॥ 15 ॥

पाहि मामुमामनोज्ञदेह ते नमः शिवाय
देहि मे वरं सिताद्रिगेह ते नमः शिवाय ।
मोहितर्षिकामिनीसमूह ते नमः शिवाय
स्वेहितप्रसन्न कामदोह ते नमः शिवाय॥ 16

मंगलप्रदाय गोतुरंग ते नमः शिवाय
गंगया तरंगितोत्तमांग ते नमः शिवाय ।
संगरप्रवृत्तवैरिभंग ते नमः शिवाय
अंगजारये करेकुरंग ते नमः शिवाय॥ 17

ईहितक्षणप्रदानहेतवे नमः शिवाय
आहिताग्निपालकोक्षकेतवे नमः शिवाय ।
देहकांतिधूतरौप्यधातवे नमः शिवाय
गेहदुःखपुंजधूमकेतवे नमः शिवाय॥18

त्र्यक्ष दीनसत्कृपाकटाक्ष ते नमः शिवाय
दक्षसप्ततंतुनाशदक्ष ते नमः शिवाय ।
ऋक्षराजभानुपावकाक्ष ते नमः शिवाय
रक्ष मां प्रपन्नमात्ररक्ष ते नमः शिवाय॥ 19

न्यंकुपाणये शिवंकराय ते नमः शिवाय
संकटाब्धितीर्णकिंकराय ते नमः शिवाय ।
कंकभीषिताभयंकराय ते नमः शिवाय
पंकजानानाय शंकराय ते नमः शिवाय॥ 20

कर्मपाशनाश नीलकंठ ते नमः शिवाय
शर्मदाय वर्यभस्मकंठ ते नमः शिवाय ।
निर्ममर्षिसेवितोपकंठ ते नमः शिवाय
कुर्महे नतीर्नमद्विकुंठ ते नमः शिवाय॥ 21

विष्टपाधिपाय नम्रविष्णवे नमः शिवाय
शिष्टविप्रहृद्गुहाचरिष्णवे नमः शिवाय ।
इष्टवस्तुनित्यतुष्टजिष्णवे नमः शिवाय
कष्टनाशनाय लोकजिष्णवे नमः शिवाय॥ 22

अप्रमेयदिव्यसुप्रभाव ते नमः शिवाय
सत्प्रपन्नरक्षणस्वभाव ते नमः शिवाय ।
स्वप्रकाश निस्तुलानुभाव ते नमः शिवाय
विप्रडिंभदर्शितार्द्रभाव ते नमः शिवाय॥ 23
सेवकाय मे मृड प्रसीद ते नमः शिवाय

भावलभ्यतावकप्रसाद ते नमः शिवाय ।

पावकाक्ष देवपूज्यपाद ते नमः शिवाय

तावकांघ्रिभक्तदत्तमोद ते नमः शिवाय॥ 24

भुक्तिमुक्तिदिव्यभोगदायिने नमः शिवाय

शक्तिकल्पितप्रपंचभागिने नमः शिवाय ।

भक्तसंकटापहारयोगिने नमः शिवाय

युक्तसन्मनःसरोजयोगिने नमः शिवाय॥ 25

अंतकांतकाय पापहारिणे नमः शिवाय

शंतमाय दंतिचर्मधारिणे नमः शिवाय ।

संतताश्रितव्यथाविदारिणे नमः शिवाय

जंतुजातनित्यसौख्यकारिणे नमः शिवाय॥ 26 ॥

शूलिने नमो नमः कपालिने नमः शिवाय

पालिने विरिंचिमुंडमालिने नमः शिवाय ।

लीलिने विशेषरुंडमालिने नमः शिवाय

शीलिने नमः प्रपुण्यशालिने नमः शिवाय॥ 27

शिवपंचाक्षरमुद्राचतुष्पदोल्लासपद्यमणिघटितां ।
नक्षत्रमालिकामिह दधदुपकंठं नरो भवेत्सोमः ॥ 28 ॥

जगद्गुरु श्रीशंकरभगवत्पाद विरचित